# ShriKrishnasahasranAmstotra from Gargasamhita

# ગર્ગસંહિતાન્તર્ગતં શ્રીકૃષ્ણસહસ્રનામમ્

## Document Information

Text title : kRiShNasahasranAmam gargasaMhitAntargatam

File name : shrIkRiShNasahasranAmamgargasamhitA.itx

Category : sahasranAma, vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide vrbhide rediffmail.com, PSA Easwaran

Proofread by : PSA Easwaran

Acknowledge-Permission: Vishwas Bhide <a href="http://satsangdhara.net">http://satsangdhara.net</a>

Latest update : September 28, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# ગર્ગસંહિતાન્તર્ગતં શ્રીકૃષ્ણસહસ્રનામમ્

ગર્ગ ઉવાચ ।
અથોગ્રસેનો નૃપતિઃ પુત્રસ્યાશાં વિસૃજ્ય ચ ।
વ્યાસં પપ્રચ્છ સન્દેહં જ્ઞાત્વા વિશ્વં મનોમયમ્ ॥ ૧॥

ઉગ્રસેન ઉવાચ
બ્રહ્મન્ કેન પ્રકારેણ હિત્વા ચ જગતઃ સુખમ્ ।
ભજેત્ કૃષ્ણં પરંબ્રહ્મ તન્મે વ્યાખ્યાતુમર્હસિ ॥ ૨॥

વ્યાસ ઉવાચ ।
ત્વદગ્રે કથયિષ્યામિ સત્યં હિતકરં વચઃ ।
ઉગ્રસેન મહારાજ શ‍ૃણુષ્વૈકાગ્રમાનસઃ ॥ ૩॥

સેવનં કુરુ રાજેન્દ્ર રાધાશ્રીકૃષ્ણયોઃ પરમ્ ।
નિત્યં સહસ્રનામભ્યામુભયોર્ભક્તિતઃ કિલ ॥ ૪॥

સહસ્રનામ રાધાયા વિધિર્જાનાતિ ભૂપતે ।
શઙ્કરો નારદશ્ચૈવ કેચિદ્વૈ ચાસ્મદાદયઃ ॥ ૫॥

ઉગ્રસેન ઉવાચ ।
રાધિકાનામસાહસ્રં નારદાચ્ચ પુરા શ્રુતમ્ ।
એકાન્તે દિવ્યશિબિરે કુરુક્ષેત્રે રવિગ્રહે ॥ ૬॥

ન શ્રુતં નામસાહસ્રં કૃષ્ણસ્યાક્લિષ્ટકર્મણઃ ।
વદ તન્મે ચ કૃપયા યેન શ્રેયોઽહમાપ્નુયામ્ ॥ ૭॥

ગર્ગ ઉવાચ ।
શ્રુત્વોગ્રસેનવચનં વેદવ્યાસો મહામુનિઃ ।
પ્રશસ્ય તં પ્રીતમનાઃ પ્રાહ કૃષ્ણં વિલોકયન્ ॥ ૮॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ સહસ્રં નામ સુન્દરમ્ ।

પુરા સ્વધામ્નિ રાધાયૈ કૃષ્ણેનાનેન નિર્મિતમ્ ॥ ૯॥

શ્રીભગવાનુવાચ ।
ઇદં રહસ્યં કિલ ગોપનીયં દત્તે ચ હાનિઃ સતતં ભવેદ્ધિ ।
મોક્ષપ્રદં સર્વસુખપ્રદં શં પરં પરાર્થં પુરુષાર્થદં ચ ॥ ૧૦॥

રૂપં ચ મે કૃષ્ણસહસ્રનામ પઠેત્તુ મદ્રૂપ ઇવ પ્રસિદ્ધઃ ।
દાતવ્યમેવં ન શઠાય કુત્ર ન દામ્ભિકાયોપદિશેત્ કદાપિ ॥ ૧૧॥

દાતવ્યમેવં કરુણાવૃતાય ગુર્વંઘ્રિભક્તિપ્રપરાયણાય ।
શ્રીકૃષ્ણભક્તાય સતાં પરાય તથા મદક્રોધવિવર્જિતાય ॥ ૧૨॥

ૐ અસ્ય શ્રીકૃષ્ણસહસ્રનામસ્તોત્રમન્ત્રસ્ય નારાયણઋષિઃ ।
ભુજઙ્ગપ્રયાતં છન્દઃ । શ્રીકૃષ્ણચન્દ્રો દેવતા ।
વાસુદેવો બીજમ્ । શ્રીરાધા શક્તિઃ । મન્મથઃ કીલકમ્ ।
શ્રીપૂર્ણબ્રહ્મકૃષ્ણચન્દ્રભક્તિજન્મફલપ્રાપ્તયે જપે વિનિયોગઃ ॥

અથ ધ્યાનમ્ । (ભુજઙ્ગપ્રયાતમ્)
શિખિમુકુટવિશેષં નીલપદ્માઙ્ગદેશં
વિધુમુખકૃતકેશં કૌસ્તુભાપીતવેશમ્ ।
મધુરરવકલેશં શં ભજે ભ્રાતૃશેષં
વ્રજજનવનિતેશં માધવં રાધિકેશમ્ ॥ ૧૩॥

ઇતિ ધ્યાનમ્ ॥

ૐ હરિર્દેવકીનન્દનઃ કંસહંતા પરાત્મા ચ પીતામ્બરઃ પૂર્ણદેવઃ ।
રમેશસ્તુ કૃષ્ણઃ પરેશઃ પુરાણઃ સુરેશોઽચ્યુતો વાસુદેવશ્ચ દેવઃ ॥ ૧૪॥

ધરાભારહર્તા કૃતી રાધિકેશઃ પરો ભૂવરો દિવ્યગોલોકનાથઃ ।
સુદામ્નસ્તથા રાધિકાશાપહેતુર્ઘૃણી માનિનીમાનદો દિવ્યલોકઃ ॥ ૧૫॥

લસદ્ગોપવેષો હ્યજો રાધિકાત્મા ચલત્કુણ્ડલઃ કુન્તલી કુન્તલસ્રક્ ।
રથસ્થઃ કદા રાધયા દિવ્યરત્નઃ સુધાસૌધભૂચારણો દિવ્યવાસાઃ ॥ ૧૬॥

કદા વૃન્દકારણ્યચારી સ્વલોકે મહારત્નસિંહાસનસ્થઃ પ્રશાન્તઃ ।
મહાહંસભૈ(?)શ્ચામરૈર્વીજ્યમાનશ્ચલચ્છત્રમુક્તાવલીશોભમાનઃ ॥ ૧૭॥

સુખી કોટિકન્દર્પલીલાભિરામઃ ક્વણન્નૂપુરાલઙ્કૃતાંઘ્રિઃ શુભાંઘ્રિઃ ।
સુજાનુશ્ચ રંભાશુભોરુઃ કૃશાઙ્ગઃ પ્રતાપી ભુશુણ્ડાસુદોર્દણ્ડખણ્ડઃ ॥ ૧૮॥

જપાપુષ્પહસ્તશ્ચ શાતોદરશ્રીર્મહાપદ્મવક્ષસ્થલશ્ચન્દ્રહાસઃ ।
લસત્કુન્દદન્તશ્ચ બિમ્બાધરશ્રીઃ શરત્પદ્મનેત્રઃ કિરીટોજ્જ્વલાભઃ ॥ ૧૯॥

સખીકોટિભિર્વર્તમાનો નિકુઞ્જે પ્રિયારાધયા રાસસક્તો નવાઙ્ગઃ ।
ધરાબ્રહ્મરુદ્રાદિભિઃ પ્રાર્થિતઃ સદ્ધરાભારદૂરીકૃતાર્થં પ્રજાતઃ ॥ ૨૦॥

યદુર્દેવકીસૌખ્યદો બન્ધનચ્છિત્ સશેષો વિભુર્યોગમાયી ચ વિષ્ણુઃ ।
વ્રજે નન્દપુત્રો યશોદાસુતાખ્યો મહાસૌખ્યદો બાલરૂપઃ શુભાઙ્ગઃ ॥ ૨૧॥

તથા પૂતનામોક્ષદઃ શ્યામરૂપો દયાલુસ્ત્વનોભઞ્જનઃ પલ્લવાંઘ્રિઃ ।
તૃણાવર્તસંહારકારી ચ ગોપો યશોદાયશો વિશ્વરૂપપ્રદર્શી ॥ ૨૨॥

તથા ગર્ગદિષ્ટશ્ચ ભાગ્યોદયશ્રીઃ લસદ્બાલકેલિઃસરામઃ સુવાચઃ ।
ક્વણન્નૂપુરૈઃ શબ્દયુગ્રિઙ્ગમાણસ્તથા જાનુહસ્તૈર્વ્રજેશાઙ્ગણે વા ॥ ૨૩॥

દધિસ્પૃક્ચ હૈયઙ્ગવીદુગ્ધભોક્તા દધિસ્તેયકૃદ્દુગ્ધભુગ્ભાણ્ડભેત્તા ।
મૃદં ભુક્તવાન્ ગોપજો વિશ્વરૂપઃ પ્રચણ્ડાંશુચણ્ડપ્રભામણ્ડિતાઙ્ગઃ ॥ ૨૪॥

યશોદાકરૈર્વર્ધનં પ્રાપ્ત આદ્યો મણિગ્રીવમુક્તિપ્રદો દામબદ્ધઃ ।
કદા નૃત્યમાનો વ્રજે ગોપિકાભિઃ કદા નન્દસન્નન્દકૈર્લાલ્યમાનઃ ॥ ૨૫॥

કદા ગોપનન્દાંકગોપાલરૂપી કલિન્દાઙ્ગજાકૂલગો વર્તમાનઃ ।
ઘનૈર્મારુતૈશ્છન્નભાણ્ડીરદેશે ગૃહીતો વરો રાધયા નન્દહસ્તાત્ ॥ ૨૬॥

નિકુઞ્જે ચ ગોલોકલોકાગતેઽપિ મહારત્નસઙ્ઘૈઃ કદમ્બાવૃતેઽપિ ।
તદા બ્રહ્મણા રાધિકાસદ્વિવાહે પ્રતિષ્ઠાં ગતઃ પૂજિતઃ સામમન્ત્રૈઃ ॥ ૨૭॥

રસી રાસયુઙ્માલતીનાં વનેઽપિ પ્રિયારાધયાઽઽરાધિતાર્થો રમેશઃ ।
variation પ્રિયારાધયા રાધિકાર્થમ્
ધરાનાથ આનન્દદઃ શ્રીનિકેતો વનેશો ધની સુન્દરો ગોપિકેશઃ ॥ ૨૮॥

કદા રાધયા પ્રાપિતો નન્દગેહે યશોદાકરૈર્લાલિતો મન્દહાસઃ ।
ભયી ક્વાપિ વૃન્દારકારણ્યવાસી મહામન્દિરે વાસકૃદ્દેવપૂજ્યઃ ॥ ૨૯॥

વને વત્સચારી મહાવત્સહારી બકારિઃ સુરૈઃ પૂજિતોઽઘારિનામા ।
વને વત્સકૃદ્ગોપકૃદ્ગોપવેષઃ કદા બ્રહ્મણા સંસ્તુતઃ પદ્મનાભઃ ॥ ૩૦॥

વિહારી તથા તાલભુગ્ધેનુકારિઃ સદા રક્ષકો ગોવિષાર્થિપ્રણાશી ।
કલિન્દાઙ્ગજાકૂલગઃ કાલિયસ્ય દમી નૃત્યકારી ફણેષ્વપ્રસિદ્ધઃ ॥ ૩૧॥

સલીલઃ શમી જ્ઞાનદઃ કામપૂરસ્તથા ગોપયુગ્ગોપ આનન્દકારી ।

સ્થિરીહ્યગ્નિભુક્પાલકો બાલલીલઃ સુરાગશ્ચ વંશીધરઃ પુષ્પશીલઃ ॥ ૩૨॥

પ્રલમ્બપ્રભાનાશકો ગૌરવર્ણો બલો રોહિણીજશ્ચ રામશ્ચ શેષઃ ।
બલી પદ્મનેત્રશ્ચ કૃષ્ણાગ્રજશ્ચ ધરેશઃ ફણીશસ્તુ નીલામ્બરાભઃ ॥ ૩૩॥

મહાસૌખ્યદો હ્યગ્નિહારો વ્રજેશઃ શરદ્ગ્રીષ્મવર્ષાકરઃ કૃષ્ણવર્ણઃ ।
વ્રજે ગોપિકાપૂજિતશ્ચીરહર્તા કદમ્બે સ્થિતશ્ચીરદઃ સુન્દરીશઃ ॥ ૩૪॥

ક્ષુધાનાશકૃદ્યજ્ઞપત્નીમનઃસ્પૃક્કૃપાકારકઃ કેલિકર્તાવનીશઃ ।
વ્રજે શક્રયાગપ્રણાશી મિતાશી શુનાસીરમોહપ્રદો બાલરૂપી ॥ ૩૫॥

ગિરેઃ પૂજકો નન્દપુત્રો હ્યગધ્રઃ કૃપાકૃચ્ચ ગોવર્ધનોદ્ધારિનામા ।
તથા વાતવર્ષાહરો રક્ષકશ્ચ વ્રજાધીશગોપાઙ્ગનાશઙ્કિતઃ સન્ ॥ ૩૬॥

અગેન્દ્રોપરિ શક્રપૂજ્યઃ સ્તુતઃ પ્રાઙ્મૃષાશિક્ષકો દેવગોવિન્દનામા ।
વ્રજાધીશરક્ષાકરઃ પાશિપૂજ્યોઽનુજૈર્ગોપજૈર્દિવ્યવૈકુણ્ઠદર્શી ॥ ૩૭॥

ચલચ્ચારુવંશીક્વણઃ કામિનીશો વ્રજે કામીનીમોહદઃ કામરૂપઃ ।
રસાક્તો રસી રાસકૃદ્રાધિકેશો મહામોહદો માનિનીમાનહારી ॥ ૩૮॥

વિહારી વરો માનહૃદ્રાધિકાંગો ધરાદ્વીપગઃ ખણ્ડચારી વનસ્થઃ ।
પ્રિયો હ્યષ્ટવક્રર્ષિદ્રષ્ટા સરાધો મહામોક્ષદઃ પદ્મહારી પ્રિયાર્થઃ ॥ ૩૯॥

વટસ્થઃ સુરશ્ચન્દનાક્તઃ પ્રસક્તો વ્રજં હ્યાગતો રાધયા મોહિનીષુ ।
મહામોહકૃદ્ગોપિકાગીતકીર્તી રસસ્થઃ પટી દુઃખિતાકામિનીશઃ ॥ ૪૦॥

વને ગોપિકાત્યાગકૃત્પાદચિહ્નપ્રદર્શી કલાકારકઃ કામમોહી ।
વશી ગોપિકામધ્યગઃ પેશવાચઃ પ્રિયાપ્રીતિકૃદ્રાસરક્તઃ કલેશઃ ॥ ૪૧॥

રસારક્તચિત્તો હ્યનન્તસ્વરૂપઃ સ્રજા સંવૃતો વલ્લવીમધ્યસંસ્થઃ ।
સુબાહુઃ સુપાદઃ સુવેશઃ સુકેશો વ્રજેશઃ સખા વલ્લભેશઃ સુદેશઃ ॥ ૪૨॥

ક્વણત્કિઙ્કિણીજાલભૃન્નૂપુરાઢ્યો લસત્કઙ્કણો હ્યઙ્ગદી હારભારઃ ।
કિરીટી ચલત્કુણ્ડલશ્ચાઙ્ગુલીયસ્ફુરત્કૌસ્તુભો માલતીમણ્ડિતાઙ્ગઃ ॥ ૪૩॥

મહાનૃત્યકૃદ્રાસરઙ્ગઃ કલાઢ્યશ્ચલદ્ધારભો ભામિનીનૃત્યયુક્તઃ ।
કલિન્દાઙ્ગજાકેલિકૃત્કુંકુમશ્રીઃ સુરૈર્નાયિકાનાયકૈર્ગીયમાનઃ ॥ ૪૪॥

સુખાઢ્યસ્તુ રાધાપતિઃ પૂર્ણબોધઃ કટાક્ષસ્મિતીવલ્ગિતભ્રૂવિલાસઃ ।
સુરમ્યોઽલિભિઃ કુન્તલાલોલકેશઃ સ્ફુરદ્બર્હકુન્દસ્રજા ચારુવેષઃ ॥ ૪૫॥

મહાસર્પતો નન્દરક્ષાપરાંઘ્રિઃ સદા મોક્ષદઃ શઙ્ખચૂડપ્રણાશી ।
variation મહામોક્ષદઃ
પ્રજારક્ષકો ગોપિકાગીયમાનઃ કકુદ્મિપ્રણાશપ્રયાસઃ સુરેજ્યઃ ॥ ૪૬॥

કલિઃ ક્રોધકૃત્કંસમન્ત્રોપદેષ્ટા તથાક્રૂરમન્ત્રોપદેશી સુરાર્થઃ ।
બલી કેશિહા પુષ્પવર્ષોઽમલશ્રીસ્તથા નારદાદ્દર્શિતો વ્યોમહન્તા ॥ ૪૭॥

તથાક્રૂરસેવાપરઃ સર્વદર્શી વ્રજે ગોપિકામોહદઃ કૂલવર્તી ।
સતીરાધિકાબોધદઃ સ્વપ્નકર્તા વિલાસી મહામોહનાશી સ્વબોધઃ ॥ ૪૮॥

વ્રજે શાપતસ્ત્યક્તરાધાસકાશો મહામોહદાવાગ્નિદગ્ધાપતિશ્ચ ।
સખીબન્ધનાન્મોહિતાક્રૂર આરાત્સખીકઙ્કણૈસ્તાડિતાક્રૂરરક્ષી ॥ ૪૯॥

રથસ્થો વ્રજે રાધયા કૃષ્ણચન્દ્રઃ સુગુપ્તો ગમી ગોપકૈશ્ચારુલીલઃ ।
જલેઽક્રૂરસન્દર્શિતો દિવ્યરૂપો દિદૃક્ષુઃ પુરીમોહિનીચિત્તમોહી ॥ ૫૦॥

તથા રઙ્ગકારપ્રણાશી સુવસ્ત્રઃસ્રજી વાયકપ્રીતિકૃન્માલિપૂજ્યઃ ।
મહાકીર્તિદશ્ચાપિ કુબ્જાવિનોદી સ્ફુરચ્ચણ્ડકોદણ્ડરુગ્ણપ્રચણ્ડઃ ॥ ૫૧॥

ભટાર્તિપ્રદઃ કંસદુઃસ્વપ્નકારી મહામલ્લવેષઃ કરીન્દ્રપ્રહારી ।
મહામાત્યહા રઙ્ગભૂમિપ્રવેશી રસાઢ્યો યશઃસ્પૃગ્બલી વાક્પટુશ્રીઃ ॥ ૫૨॥

મહામલ્લહા યુદ્ધકૃત્સ્ત્રીવચોઽર્થી ધરાનાયકઃ કંસહન્તા યદુઃપ્રાક્ ।
સદા પૂજિતો હ્યુગ્રસેનપ્રસિદ્ધો ધરારાજ્યદો યાદવૈર્મણ્ડિતાઙ્ગઃ ॥ ૫૩॥

ગુરોઃ પુત્રદો બ્રહ્મવિદ્બ્રહ્મપાઠી મહાશઙ્ખહા દણ્ડધૃક્પૂજ્ય એવ ।
વ્રજે હ્યુદ્ધવપ્રેષિતો ગોપમોહી યશોદાઘૃણી ગોપિકાજ્ઞાનદેશી ॥ ૫૪॥

સદા સ્નેહકૃત્કુબ્જયા પૂજિતાઙ્ગસ્તથાક્રૂરગેહંગમી મન્ત્રવેત્તા ।
તથા પાણ્ડવપ્રેષિતાક્રૂર એવ સુખી સર્વદર્શી નૃપાનન્દકારી ॥ ૫૫॥

મહાક્ષૌહિણીહા જરાસન્ધમાની નૃપો દ્વારકાકારકો મોક્ષકર્તા ।
રણી સાર્વભૌમસ્તુતો જ્ઞાનદાતા જરાસન્ધસઙ્કલ્પકૃદ્ધાવદંઘ્રિઃ ॥ ૫૬॥

નગાદુત્પતદ્દ્વારિકામધ્યવર્તી તથા રેવતીભૂષણસ્તાલચિહ્નઃ ।
યદૂ રુક્મિણીહારકશ્ચૈદ્યવેદ્યસ્તથા રુક્મિરૂપપ્રણાશી સુખાશી ॥ ૫૭॥

અનન્તશ્ચ મારશ્ચ કાર્ષ્ણિશ્ચ કામો મનોજસ્તથા શમ્બરારી રતીશઃ ।
રથી મન્મથો મીનકેતુઃ શરી ચ સ્મરો દર્પકો માનહા પઞ્ચબાણઃ ॥ ૫૮॥

પ્રિયઃ સત્યભામાપતિર્યાદવેશોઽથ સત્રાજિતપ્રેમપૂરઃ પ્રહાસઃ ।

મહારત્નદો જામ્બવદ્યુદ્ધકારી મહાચક્રધૃક્ખડ્ગધૃગ્રામસંધિઃ ॥ ૫૯॥

વિહારસ્થિતઃ પાણ્ડવપ્રેમકારી કલિન્દાઙ્ગજામોહનઃ ખાણ્ડવાર્થી ।
સખા ફાલ્ગુનપ્રીતિકૃન્નગ્નકર્તા તથા મિત્રવિન્દાપતિઃ ક્રીડનાર્થી ॥ ૬૦॥

નૃપપ્રેમકૃદ્ગોજિતઃ સપ્તરૂપોઽથ સત્યાપતિઃ પારિબર્હી યથેષ્ટઃ ।
નૃપૈઃ સંવૃતશ્ચાપિ ભદ્રાપતિસ્તુ વિલાસી મધોર્માનિનીશો જનેશઃ ॥ ૬૧॥

શુનાસીરમોહાવૃતઃ સત્સભાર્યઃ સતાર્ક્ષ્યો મુરારિઃ પુરીસઙ્ઘભેત્તા ।
સુવીરઃશિરઃખણ્ડનો દૈત્યનાશી શરી ભૌમહા ચણ્ડવેગઃ પ્રવીરઃ ॥ ૬૨॥

ધરાસંસ્તુતઃ કુણ્ડલચ્છત્રહર્તા મહારત્નયુગ્ રાજકન્યાભિરામઃ ।
શચીપૂજિતઃ શક્રજિન્માનહર્તા તથા પારિજાતાપહારી રમેશઃ ॥ ૬૩॥

ગૃહી ચામરૈઃ શોભિતો ભીષ્મકન્યાપતિર્હાસ્યકૃન્માનિનીમાનકારી ।
તથા રુક્મિણીવાક્પટુઃ પ્રેમગેહઃ સતીમોહનઃ કામદેવાપરશ્રીઃ ॥ ૬૪॥

સુદેષ્ણઃ સુચારુસ્તથા ચારુદેષ્ણોઽપરશ્ચારુદેહો બલી ચારુગુપ્તઃ ।
સુતી ભદ્રચારુસ્તથા ચારુચન્દ્રો વિચારુશ્ચ ચારૂ રથી પુત્રરૂપઃ ॥ ૬૫॥

સુભાનુઃ પ્રભાનુસ્તથા ચન્દ્રભાનુર્બૃહદ્ભાનુરેવાષ્ટભાનુશ્ચ સામ્બઃ ।
સુમિત્રઃ ક્રતુશ્ચિત્રકેતુસ્તુ વીરોઽશ્વસેનો વૃષશ્ચિત્રગુશ્ચન્દ્રબિમ્બઃ ॥ ૬૬॥

વિશઙ્કુર્વસુશ્ચ શ્રુતો ભદ્ર એકઃ સુબાહુર્વૃષઃ પૂર્ણમાસસ્તુ સોમઃ ।
વરઃ શાન્તિરેવ પ્રઘોષોઽથ સિંહો બલો હ્યૂર્ધ્વગોવર્ધનોન્નાદ એવ ॥ ૬૭॥

મહાશો વૃકઃ પાવનો વહ્નિમિત્રઃ ક્ષુધિર્હર્ષકશ્ચાનિલોઽમિત્રજિચ્ચ ।
સુભદ્રો જયઃ સત્યકો વામ આયુર્યદુઃ કોટિશઃ પુત્રપૌત્રપ્રસિદ્ધઃ ॥ ૬૮॥

હલી દણ્ડધૃગ્રુક્મિહા ચાનિરુદ્ધસ્તથા રાજભિર્હાસ્યગો દ્યૂતકર્તા ।
મધુર્બ્રહ્મસૂર્બાણપુત્રીપતિશ્ચ મહાસુન્દરઃ કામપુત્રો બલીશઃ ॥ ૬૯॥

મહાદૈત્યસંગ્રામકૃદ્યાદવેશઃ પુરીભઞ્જનો ભૂતસંત્રાસકારી ।
મૃધી રુદ્રજિદ્રુદ્રમોહી મૃધાર્થી તથા સ્કન્દજિત્કૂપકર્ણપ્રહારી ॥ ૭૦॥

ધનુર્ભઞ્જનો બાણમાનપ્રહારી જ્વરોત્પત્તિકૃત્સંસ્તુતસ્તુ જ્વરેણ ।
ભુજાચ્છેદકૃદ્બાણસંત્રાસકર્તા મૃડપ્રસ્તુતો યુદ્ધકૃદ્ભૂમિભર્તા ॥ ૭૧॥

નૃગં મુક્તિદો જ્ઞાનદો યાદવાનાં રથસ્થો વ્રજપ્રેમપો ગોપમુખ્યઃ ।
મહાસુન્દરીક્રીડિતઃ પુષ્પમાલી કલિન્દાઙ્ગજાભેદનઃ સીરપાણિઃ ॥ ૭૨॥

મહાદંભિહા પૌણ્ડ્રમાનપ્રહારો શિરશ્છેદકઃ કાશિરાજપ્રણાશી ।
મહાક્ષૌહિણીધ્વંસકૃચ્ચક્રહસ્તઃ પુરીદીપકો રાક્ષસીનાશકર્તા ॥ ૭૩॥

અનન્તો મહીધ્રઃ ફણી વાનરારિઃ સ્ફુરદ્ગૌરવર્ણો મહાપદ્મનેત્રઃ ।
કુરુગ્રામતિર્યગ્ગતો ગૌરવાર્થઃ સ્તુતઃ કૌરવૈઃ પારિબર્હી સસામ્બઃ ॥ ૭૪॥

મહાવૈભવી દ્વારકેશો હ્યનેકશ્ચલન્નારદઃ શ્રીપ્રભાદર્શકસ્તુ ।
મહર્ષિસ્તુતો બ્રહ્મદેવઃ પુરાણઃ સદા ષોડશસ્ત્રીસહસ્રસ્થિતશ્ચ ॥ ૭૫.. ..

ગૃહી લોકરક્ષાપરો લોકરીતિઃ પ્રભુર્હ્યુગ્રસેનાવૃતો દુર્ગયુક્તઃ ।
તથા રાજદૂતસ્તુતો બન્ધભેત્તા સ્થિતો નારદપ્રસ્તુતઃ પાણ્ડવાર્થી ॥ ૭૬॥

નૃપૈર્મન્ત્રકૃત્ હ્યુદ્ધવપ્રીતિપૂર્ણો વૃતઃ પુત્રપૌત્રૈઃ કુરુગ્રામગન્તા ।
ધૃણી ધર્મરાજસ્તુતો ભીમયુક્તઃ પરાનન્દદો મન્ત્રકૃદ્ધર્મજેન ॥ ૭૭॥

દિશાજિદ્બલી રાજસૂયાર્થકારી જરાસન્ધહા ભીમસેનસ્વરૂપઃ ।
તથા વિપ્રરૂપો ગદાયુદ્ધકર્તા કૃપાલુર્મહાબન્ધનચ્છેદકારી ॥ ૭૮॥

નૃપૈઃ સંસ્તુતો હ્યાગતો ધર્મગેહં દ્વિજૈઃ સંવૃતો યજ્ઞસંભારકર્તા ।
જનૈઃ પૂજિતશ્ચૈદ્યદુર્વાક્ક્ષમશ્ચ મહામોહદોઽરેઃ શિરશ્છેદકારી ॥ ૭૯॥

મહાયજ્ઞશોભાકરશ્ચક્રવર્તી નૃપાનન્દકારી વિહારી સુહારી ।
સભાસંવૃતો માનહૃત્કૌરવસ્ય તથા શાલ્વસંહારકો યાનહન્તા ॥ ૮૦॥

સભોજશ્ચ વૃષ્ણિર્મધુઃશૂરસેનો દશાર્હો યદુર્હ્યંધકો લોકજિચ્ચ ।
દ્યુમન્માનહા વર્મધૃગ્દિવ્યશસ્ત્રી સ્વબોધઃ સદા રક્ષકો દૈત્યહન્તા ॥ ૮૧॥

તથા દન્તવક્ત્રપ્રણાશી ગદાધૃગ્જગત્તીર્થયાત્રાકરઃ પદ્મહારઃ ।
કુશી સૂતહન્તા કૃપાકૃત્સ્મૃતીશોઽમલો બલ્વલાઙ્ગપ્રભાખણ્ડકારી ॥ ૮૨॥

તથા ભીમદુર્યોધનજ્ઞાનદાતાપરો રોહિણીસૌખ્યદો રેવતીશઃ ।
મહાદાનકૃદ્વિપ્રદારિદ્ર્યહા ચ સદા પ્રેમયુક્ શ્રીસુદામ્નઃ સહાયઃ ॥ ૮૩॥

તથા ભાર્ગવક્ષેત્રગન્તા સરામોઽથ સૂર્યોપરાગશ્રુતઃ સર્વદર્શી ।
મહાસેનયા ચાસ્થિતઃ સ્નાનયુક્તો મહાદાનકૃન્મિત્રસમ્મેલનાર્થી ॥ ૮૪॥

તથા પાણ્ડવપ્રીતિદઃ કુન્તિજાર્થી વિશાલાક્ષમોહપ્રદઃ શાન્તિદશ્ચ ।
વટે રાધિકારાધનો ગોપિકાભિઃ સખીકોટિભી રાધિકાપ્રાણનાથઃ ॥ ૮૫॥

સખીમોહદાવાગ્નિહા વૈભવેશઃ સ્ફુરત્કોટિકન્દર્પલીલાવિશેષઃ ।
સખીરાધિકાદુઃખનાશી વિલાસી સખીમધ્યગઃ શાપહા માધવીશઃ ॥ ૮૬॥

શતં વર્ષવિક્ષેપહૃન્નન્દપુત્રસ્તથા નન્દવક્ષોગતઃ શીતલાઙ્ગઃ ।
યશોદાશુચઃ સ્નાનકૃદ્દુઃખહન્તા સદાગોપિકાનેત્રલગ્નો વ્રજેશઃ ॥ ૮૭॥

સ્તુતો દેવકીરોહિણીભ્યાં સુરેન્દ્રો રહો ગોપિકાજ્ઞાનદો માનદશ્ચ ।
તથા સંસ્તુતઃ પટ્ટરાજ્ઞીભિરારાદ્ધની લક્ષ્મણાપ્રાણનાથઃ સદા હિ ॥ ૮૮॥

ત્રિભિઃ ષોડશસ્ત્રીસહસ્રસ્તુતાઙ્ગઃ શુકો વ્યાસદેવઃ સુમન્તુઃ સિતશ્ચ ।
ભરદ્વાજકો ગૌતમો હ્યાસુરિઃ સદ્વસિષ્ઠઃ શતાનન્દ આદ્યઃ સરામઃ ॥ ૮૯॥

મુનિઃ પર્વતો નારદો ધૌમ્ય ઇન્દ્રોઽસિતોઽત્રિર્વિભાણ્ડઃ પ્રચેતાઃ કૃપશ્ચ ।
કુમારઃ સનન્દસ્તથા યાજ્ઞવલ્ક્યઃ ઋભુર્હ્યઙ્ગિરા દેવલઃ શ્રીમૃકણ્ડઃ ॥ ૯૦॥

મરીચી ક્રતુશ્ચૌર્વકો લોમશશ્ચ પુલસ્ત્યો ભૃગુર્બ્રહ્મરાતો વસિષ્ઠઃ ।
નરશ્ચાપિ નારાયણો દત્ત એવ તથા પાણિનિઃ પિઙ્ગલો ભાષ્યકારઃ ॥ ૯૧॥

સકાત્યાયનો વિપ્રપાતઞ્જલિશ્ચાથ ગર્ગો ગુરુર્ગીષ્પતિર્ગૌતમીશઃ ।
મુનિર્જાજલિઃ કશ્યપો ગાલવશ્ચ દ્વિજઃ સૌભરિશ્ચર્ષ્યશ઼ૃઙ્ગશ્ચ કણ્વઃ ॥ ૯૨॥

દ્વિતશ્ચૈકતશ્ચાપિ જાતૂદ્ભવશ્ચ ઘનઃ કર્દમસ્યાત્મજઃ કર્દમશ્ચ ।
તથા ભાર્ગવઃ કૌત્સકશ્ચારુણસ્તુ શુચિઃ પિપ્પલાદો મૃકણ્ડસ્ય પુત્રઃ ॥ ૯૩॥

સપૈલઃસ્તથા જૈમિનિઃ સત્સુમન્તુર્વરો ગાઙ્ગલઃ સ્ફોટગેહઃ ફલાદઃ ।
સદા પૂજિતો બ્રાહ્મણઃ સર્વરૂપી મુનીશો મહામોહનાશોઽમરઃ પ્રાક્ ॥ ૯૪॥

મુનીશસ્તુતઃ શૌરિવિજ્ઞાનદાતા મહાયજ્ઞકૃચ્ચાભૃતસ્નાનપૂજ્યઃ ।
સદા દક્ષિણાદો નૃપૈઃ પારિબર્હી વ્રજાનન્દદો દ્વારિકાગેહદર્શી ॥ ૯૫॥

મહાજ્ઞાનદો દેવકીપુત્રદશ્ચાસુરૈઃ પૂજિતો હીન્દ્રસેનાદૃતશ્ચ ।
સદા ફાલ્ગુનપ્રીતિકૃત્ સત્સુભદ્રાવિવાહે દ્વિપાશ્વપ્રદો માનયાનઃ ॥ ૯૬॥

ભુવં દર્શકો મૈથિલેન પ્રયુક્તો દ્વિજેનાશુ રાજ્ઞાસ્થિતો બ્રાહ્મણૈશ્ચ ।
કૃતી મૈથિલે લોકવેદોપદેશી સદાવેદવાક્યૈઃ સ્તુતઃ શેષશાયી ॥ ૯૭॥

પરીક્ષાવૃતો બ્રાહ્મણૈશ્ચામરેષુ ભૃગુપ્રાર્થિતો દૈત્યહા ચેશરક્ષી ।
સખા ચાર્જુનસ્યાપિ માનપ્રહારી તથા વિપ્રપુત્રપ્રદો ધામગન્તા ॥ ૯૮॥

વિહારસ્થિતો માધવીભિઃ કલાઙ્ગો મહામોહદાવાગ્નિદગ્ધાભિરામઃ ।
યદુર્હ્યુગ્રસેનો નૃપોઽક્રૂર એવ તથા ચોદ્ધવઃ શૂરસેનશ્ચ શૂરઃ ॥ ૯૯॥

હૃદીકશ્ચ સત્રાજિતશ્ચાપ્રમેયો ગદઃ સારણઃ સાત્યકિર્દેવભાગઃ ।

તથા માનસઃ સઞ્જયઃ શ્યામકશ્ચ વૃકો વત્સકો દેવકો ભદ્રસેનઃ ॥ ૧૦૦॥

નૃપોઽજાતશત્રુર્જયો માદ્રિપુત્રોઽથ ભીમઃ કૃપો બુદ્ધિચક્ષુશ્ચ પાણ્ડુઃ ।
તથા શન્તનુર્દેવબાહ્લીક એવાથ ભૂરિશ્રવાશ્ચિત્રવીર્યો વિચિત્રઃ ॥ ૧૦૧॥

શલશ્ચાપિ દુર્યોધનઃ કર્ણ એવ સુભદ્રાસુતો વિષ્ણુરાતઃ પ્રસિદ્ધઃ ।
સજન્મેજયઃ પાણ્ડવઃ કૌરવશ્ચ તથા સર્વતેજા હરિઃ સર્વરૂપી ॥ ૧૦૨॥

વ્રજં હ્યાગતો રાધયા પૂર્ણદેવો વરો રાસલીલાપરો દિવ્યરૂપી ।
રથસ્થો નવદ્વીપખણ્ડપ્રદર્શી મહામાનદો ગોપજો વિશ્વરૂપઃ ॥ ૧૦૩॥

સનન્દશ્ચ નન્દો વૃષો વલ્લભેશઃ સુદામાર્જુનઃ સૌબલસ્તોક એવ ।
સકૃષ્ણો શુકઃ સદ્વિશાલર્ષભાખ્યઃ સુતેજસ્વિકઃ કૃષ્ણમિત્રો વરૂથઃ ॥ ૧૦૪॥

કુશેશો વનેશસ્તુ વૃન્દાવનેશસ્તથા મથુરેશાધિપો ગોકુલેશઃ ।
સદા ગોગણો ગોપતિર્ગોપિકેશોઽથ ગોવર્ધનો ગોપતિઃ કન્યકેશઃ ॥ ૧૦૫॥

અનાદિસ્તુ ચાત્મા હરિઃ પૂરુષશ્ચ પરો નિર્ગુણો જ્યોતિરૂપો નિરીહઃ ।
સદા નિર્વિકારઃ પ્રપઞ્ચાત્ પરશ્ચ સસત્યસ્તુ પૂર્ણઃ પરેશસ્તુ સૂક્ષ્મઃ ॥ ૧૦૬॥ સમત્ય ??
દ્વારકાયાં તથા ચાશ્વમેધસ્ય કર્તા નૃપેણાપિ પૌત્રેણ ભૂભારહર્તા ।
પુનઃ શ્રીવ્રજે રાસરઙ્ગસ્ય કર્તા હરી રાધયા ગોપિકાનાં ચ ભર્તા ॥ ૧૦૭॥

સદૈકસ્ત્વનેકઃ પ્રભાપૂરિતાઙ્ગસ્તથા યોગમાયાકરઃ કાલજિચ્ચ ।
સુદૃષ્ટિર્મહત્તત્ત્વરૂપઃ પ્રજાતઃ સકૂટસ્થ આદ્યાઙ્કુરો વૃક્ષરૂપઃ ॥ ૧૦૮॥

વિકારસ્થિતશ્ચ હ્યહઙ્કાર એવ સવૈકારિકસ્તૈજસસ્તામસશ્ચ ।
મનો દિક્સમીરસ્સ્તુ સૂર્યઃ પ્રચેતોઽશ્વિવહ્નિશ્ચ શક્રો હ્યુપેન્દ્રસ્તુ મિત્રઃ ॥ ૧૦૯॥

શ્રુતિસ્ત્વક્ચ દૃગ્ઘ્રાણજિહ્વાગિરશ્ચ ભુજામેઢ્રકઃ પાયુરઙ્ઘ્રિઃ સચેષ્ટઃ ।
ધરાવ્યોમવાર્મારુતશ્ચૈવ તેજોઽથ રૂપં રસો ગન્ધશબ્દસ્પૃશશ્ચ ॥ ૧૧૦॥

સચિત્તશ્ચ બુદ્ધિર્વિરાટ્ કાલરૂપસ્તથા વાસુદેવો જગત્કૃદ્ધતાઙ્ગઃ ।
તથાણ્ડે શયાનઃ સશેષઃ સહસ્રસ્વરૂપો રમાનાથ આદ્યોઽવતારઃ ॥ ૧૧૧॥

સદા સર્ગકૃત્પદ્મજઃ કર્મકર્તા તથા નાભિપદ્મોદ્ભવો દિવ્યવર્ણઃ ।
કવિર્લોકકૃત્કાલકૃત્સૂર્યરૂપો નિમેષો ભવો વત્સરાન્તો મહીયાન્ ॥ ૧૧૨॥

તિથિર્વારનક્ષત્રયોગાશ્ચ લગ્નોઽથ માસો ઘટી ચ ક્ષણઃ કાષ્ઠિકા ચ ।
મુહૂર્તસ્તુ યામો ગ્રહા યામિની ચ દિનં ચર્ક્ષમાલાગતો દેવપુત્રઃ ॥ ૧૧૩॥

કૃતો દ્વાપરસ્તુ ત્રિતસ્તત્કલિસ્તુ સહસ્રં યુગસ્તત્ર મન્વન્તરશ્ચ ।

લયઃ પાલનં સત્કૃતિસ્તત્પરાર્ધં સદોત્પત્તિકૃદ્વ્યક્ષરો બ્રહ્મરૂપઃ ॥ ૧૧૪॥

તથા રુદ્રસર્ગસ્તુ કૌમારસર્ગો મુનેઃ સર્ગકૃદ્દેવકૃત્પ્રાકૃતસ્તુ ।
શ્રુતિસ્તુ સ્મૃતિઃ સ્તોત્રમેવં પુરાણં ધનુર્વેદ ઇજ્યાથ ગાન્ધર્વવેદઃ ॥ ૧૧૫॥

વિધાતા ચ નારાયણઃ સત્કુમારો વરાહસ્તથા નારદો ધર્મપુત્રઃ ।
મુનિઃ કર્દમસ્યાત્મજો દત્ત એવ સયજ્ઞોઽમરો નાભિજઃ શ્રીપૃથુશ્ચ ॥ ૧૧૬॥

સુમત્સ્યશ્ચ કૂર્મશ્ચ ધન્વન્તરિશ્ચ તથા મોહિની નારસિંહઃ પ્રતાપી ।
દ્વિજો વામનો રેણુકાપુત્રરૂપો મુનિર્વ્યાસદેવઃ શ્રુતિસ્તોત્રકર્તા ॥ ૧૧૭॥

ધનુર્વેદભાગ્રામચન્દ્રાવતારઃ સસીતાપતિર્ભારહૃદ્રાવણારિઃ ।
નૃપઃ સેતુકૃદ્વાનરેન્દ્રપ્રહારી મહાયજ્ઞકૃદ્રાઘવેન્દ્રઃ પ્રચણ્ડઃ ॥ ૧૧૮॥

બલઃ કૃષ્ણચન્દ્રસ્તુ કલ્કિઃ કલેશસ્તુ બુદ્ધઃ પ્રસિદ્ધસ્તુ
હંસઃસ્તથાશ્વઃ ।
ઋષીન્દ્રોઽજિતો દેવવૈકુણ્ઠનાથો હ્યમૂર્તિશ્ચ મન્વન્તરસ્યાવતારઃ ॥ ૧૧૯॥

ગજોદ્ધારણઃ શ્રીમનુર્બ્રહ્મપુત્રો નૃપેન્દ્રસ્તુ દુષ્યન્તજો દાનશીલઃ ।
સદૃષ્ટઃ શ્રુતો ભૂત એવં ભવિષ્યદ્ભવત્સ્થાવરો જઙ્ગમોઽલ્પં મહચ્ચ ॥ ૧૨૦॥

ઇતિ શ્રીભુજઙ્ગપ્રયાતેન ચોક્તં હરે રાધિકેશસ્ય નામ્નાં સહસ્રમ્ ।
પઠેદ્ભક્તિયુક્તો દ્વિજઃ સર્વદા હિ કૃતાર્થો ભવેત્કૃષ્ણચન્દ્રસ્વરૂપઃ ॥ ૧૨૧॥

મહાપાપરાશિં ભિનત્તિ શ્રુતં યત્સદા વૈષ્ણવાનાં પ્રિયં મઙ્ગલં ચ ।
ઇદં રાસરાકાદિને ચાશ્વિનસ્ય તથા કૃષ્ણજન્માષ્ટમીમધ્ય એવ ॥ ૧૨૨॥

તથા ચૈત્રમાસસ્ય રાકાદિને વાથ ભાદ્રે ચ રાધાષ્ટમી સદ્દિને વા ।
પઠેદ્ભક્તિયુક્તસ્ત્વિદં પૂજયિત્વા ચતુર્ધા સુમુક્તિં તનોતિ પ્રશસ્તઃ ॥ ૧૨૩॥

પઠેત્કૃષ્ણપુર્યાં ચ વૃન્દાવને વા વ્રજે ગોકુલે વાપિ વંશીવટે વા ।
વટે વાક્ષયે વા તટે સૂર્યપુત્ર્યાઃ સ ભક્તોઽથ ગોલોકધામ પ્રયાતિ ॥ ૧૨૪॥

ભજેદ્ભક્તિભાવાચ્ચ સર્વત્રભૂમૌ હરિં કુત્ર ચાનેન ગેહે વને વા ।
જહાતિ ક્ષણં નો હરિસ્તં ચ ભક્તં સુવશ્યો ભવેન્માધવઃ કૃષ્ણચન્દ્રઃ ॥ ૧૨૫॥

સદા ગોપનીયં સદા ગોપનીયં સદા ગોપનીયં પ્રયત્નેન ભક્તૈઃ ।
પ્રકાશ્યં ન નામ્નાં સહસ્રં હરેશ્ચ ન દાતવ્યમેવં કદા લમ્પટાય ॥ ૧૨૬॥

ઇદં પુસ્તકં યત્ર ગેહેઽપિ તિષ્ઠેદ્વસેદ્રાધિકાનાથ આદ્યસ્તુ તત્ર ।
તથા ષડ્ગુણાઃ સિદ્ધયો દ્વાદશાપિ ગુણૈસ્ત્રિંશદ્ભિર્લક્ષણૈસ્તુ પ્રયાન્તિ ॥ ૧૨૭॥

ઇતિ શ્રીમદ્ગર્ગસંહિતાયાં અશ્વમેધખણ્ડે શ્રીકૃષ્ણસહસ્રનામવર્ણનં
નામૈકોનષષ્ટિતમોઽધ્યાયઃ ॥ દશમખણ્ડે અધ્યાય ૫૯ ॥

Encoded and proofread by PSA Easwaran

---

*ShriKrishnasahasranAmstotra from Gargasamhita*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*